त्रिगणः, पुं, (त्रयाणां धर्म्मार्थकामानां गणो वर्गः।) त्रिवर्गः। धर्म्मार्थकामाः। इत्यमरटीकायां नीलकण्ठः॥ (यथा, किरातार्ज्जुनीये। १।११।

"गुणानुरागादिव सख्यमीयिवा-
न्न बाधतेऽस्य त्रिगणः परस्परम्॥")

त्रिगर्त्तः, पुं, (त्रयो गर्त्ता यत्र।) देशविशेषः। लाहोराख्यदेशैकभागः। तत्पर्य्यायः। जालन्धरः २। इति हेमचन्द्रः। ४।२४॥ (देशोऽयं कूर्म्मविभागे उत्तरस्यामुक्तः। यथा, वृहत्संहितायाम्। १४।२५।

"उत्तरतः कैलासः" इत्युपक्रम्य,—
"त्रिगर्त्ततुरगाननाश्वमुखाः॥"
इत्युक्तवान्॥)

तद्देशस्थे पुं भूम्नि। (यथा, महाभारते। २। २७। १८।

"ततस्त्रिगर्त्तान् कौन्तेयं दार्व्वान् कोकनदास्तथा।
क्षत्त्रिया बहवो राजन्नुपावर्त्तन्त सर्व्वशः॥")

गणितान्तरम्। इति मेदिनी। ते, ११३॥

त्रिगर्त्तकः, पुं, (त्रिगर्त्त एव। स्वार्थे कन्।) त्रिगर्त्तदेशः। इति त्रिकाण्डशेषः॥

त्रिगर्त्ता, स्त्री, (त्रयो गर्त्ता यस्याः।) घुर्घुरिका। (त्रयो बहवो गर्त्ता इव योनिद्वाराणि यस्याः।) कामुककाङ्गना। इति मेदिनी। ते, ११३॥

त्रिगर्त्तिकः, पुं, (त्रयो गर्त्ताः सन्ति यत्र। त्रिगर्त्त+बहुलवचनात् ठन्।) त्रिगर्त्तदेशः। इति भूरिप्रयोगः॥

त्रिगुणं, क्ली, (त्रयाणां सत्त्वरजस्तमसां गुणानां समाहारः।) सत्त्वरजस्तमांसि। इति श्रीभागवतम्॥ (प्रधानः। यथा, भागवते।४।२४।२८।

"यः परं रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात्।"
"रंहसः सूक्ष्मात् त्रिगुणात् प्रधानात् जीवसंज्ञितात् पुरुषाच्च परम्॥" इति तट्टीकायां स्वामी॥) त्रयाणां पूरणे गुणत्रययुक्ते च त्रि॥ (यथा, मनुः। १। १५।

"महान्तमेव चात्मानं सर्व्वाणि त्रिगुणानि च।
विषयाणां ग्रहीतॄणि शनैः पञ्चेन्द्रियाणि च॥"

त्रयो गुणा आवृत्तयो यस्य। त्रिभिर्गुणितै। यथा, रघुः। २। २५।

"सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य॥")

त्रिगुणा, स्त्री, (त्रयो गुणा यस्याः।) दुर्गा। यथा, देवीपुराणे ४५ अध्याये।

"पदैस्त्रिभिर्व्वलिर्बद्धो रागादित्रिपदाथ वा।
उत्पत्तिस्थितिनाशेषु रजादित्रिगुणा मता॥"

(तथाच देवीभागवते। १२। ६। ६५।

"त्रिगुणा त्रिपदा तन्त्री तुलसी तरुणातरुः॥"

स्वनामख्यातो बीजभेदः। इति तन्त्रसारः॥)

त्रिगुणाकृतं, त्रि, (त्रिगुणं कर्षणं कृतम्। त्रिगुण+कृतम्। "संख्यायाश्च गुणान्तायाः।" ५। ४। ५६। इति डाच्।) वारत्रयकृष्टक्षेत्रम्। इत्यमरः। २। ९। ९॥

त्रिजटा, स्त्री, (तिस्रो जटा यस्याः।) राक्षसीविशेषः। यथा,—

"सीतां ताभिरनार्य्याभिर्दृष्ट्वा सन्तर्ज्जितां तदा।
राक्षसी त्रिजटा वृद्धा प्रबुद्धा वाक्यमब्रवीत्॥"

इति रामायणे सुन्दरकाण्डे २७ अध्यायः॥*॥ बिल्ववृक्षः। यथा, ज्ञानभैरवतन्त्रे ६ पटोले।

"शृणु देवि! प्रवक्ष्यामि रहस्यं त्रिजटोत्तमम्।
पत्रं ब्रह्ममयं देवि! अद्भुतं वरवर्णिनि!॥
श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः।
विष्णुप्रीतिकरस्यैव मम प्रीतिकरः सदा॥
ब्रह्मविष्णुशिवाः पत्रे वृन्तञ्च शक्तिरूपिणी।
वृन्तमूले तु वर्णं स्यात् पत्रं ब्रह्म विदं प्रिये!॥
एकञ्च त्रिजटापत्रैर्हरं वा हरिमर्च्चयेत्।
कैवल्यं तस्य तेनैव शक्तिपूजा विशेषतः॥"

अन्यत् बिल्वशब्दे द्रष्टव्यम्॥ (भगवती। सा च गायत्त्रीस्वरूपा। यथा, देवीभागवते।१२।६।७२।

"त्रिजटा तित्तिरी तृष्णा त्रिविधा तरुणाकृतिः॥")

त्रिजातकं, क्ली, (त्रिगुणितं जातं सुगन्धिद्रव्यरूपम्। ततः स्वार्थे कन्।) मिलिततुल्यत्वगेलापत्राणि। यथा,—

"एलात्वक्पत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्।
चातुर्जातं सनागन्तु द्वयं वातकफापहम्॥"

अपि च।

"त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्।
नागकेशरसंयुक्तं चातुर्जातकमुच्यते॥"
इति राजनिर्घण्टः॥

(अस्य लक्षणपर्य्याया यथा,—

"त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्।
तद्द्वयं रेचनं रूक्षं तीक्ष्णोष्णं मुखगन्धहृत्।
लघुपित्ताग्निकृद्बल्यं कफवातविषापहम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

त्रिणं, क्ली, (तृण+पृषोदरादित्वात् साधुः।) तृणम्। इति शब्दरत्नावली॥ (यथा, तृणशब्दव्युत्पत्तौ उज्ज्वलदत्तः। ५। ८।

"रेफिकारसंयुक्तमव्युत्पन्नं शब्दान्तरमस्ति।
'उत्तुङ्गिप्रत्रिणपत्रपांशुविहगः सौम्यस्वनः
पूजितः।'
इति वराहः॥")

त्रिणता, स्त्री, (त्रिषु स्थानेषु नता। "पूर्व्वपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्।) धनुः। इति त्रिकाण्डशेषः॥ (यथा, माघे। १९। ६१।

"स्वगुणैराफलप्राप्तेराकृष्य गणिका इव।
कामुका इव नालीकांस्त्रिणताः सहसामुचन्॥"

त्रिणस्य भावः। त्रिण+तल्।) त्रिणत्वञ्च। (त्रिषु स्थानेषु नते, त्रि। यथा, रामायणे। ६। २०। २८।

"भिन्नमुष्टिपरिष्वक्तं त्रिणतं कनकरञ्जितम्।
बाणपातान्तरे रामः पतितं पुरुषर्षभम्।
शयानं लक्ष्मणं दृष्ट्वा निराशो जीवितेऽभवत्॥")

त्रिणाचिकेतः, पुं, (त्रिकृत्वश्चितो नाचिकेतोऽग्निर्येन। पूर्व्वपदादिति णत्वम्।) यजुर्व्वेदैकदेशो ग्रन्थः। तद्वेदाध्यायी। (यथा, मनुः। ३। १८५।

"त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित्॥"
"त्रिणाचिकेतः अध्वर्य्युवेदभागस्तद्व्रतञ्च तद्योगात् पुरुषोऽपि त्रिणाचिकेतः॥" इति तट्टीकायां कुल्लूकभट्टः॥ नारायणस्य नामविशेषः। यथा, महाभारते १२। ३३८। ४।

"पञ्चाग्ने! त्रिणाचिकेत! षडङ्गनिधान!॥")

त्रितक्षं, क्ली स्त्री, त्रयाणां तक्षाणां समाहारः। तक्षत्रयम्। इत्यमरः। ३। ५। ४१॥

त्रितयं, क्ली, (त्रयोऽवयवा अस्य। त्रि+"संख्याया अवयवे तयप्।" ५। २। ४२। इति तयप्।) त्रयम्। इति व्याकरणम्॥ (यथा, महाभारते। १३। १११। १८।

"धर्म्मश्चार्थश्च कामश्च त्रितयं जीविते फलम्।
एतत्त्रयमवाप्तव्यमधर्म्मपरिवर्ज्जितम्॥"

त्रिप्रकारे, त्रि। यथा, पञ्चदश्याम्। १।४६।

"त्रितयीमपि तां मुक्त्वा परस्परविरोधिनीम्।
अखण्डं सच्चिदानन्दं महावाक्येन लक्ष्यते॥")

त्रिदण्डः, पुं, (त्रिदण्डं चतुरङ्गुलगोवालवेष्टनाद्दण्डोन्यसम्बन्धं अस्त्यस्येति। अर्श्आदित्वादच्।) सन्न्यासाश्रमः। यथा,—

"यस्त्वसंयतषड्वर्गः प्रचण्डेन्द्रियसारथिः।
ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति॥"
इति श्रीभागवतम्॥

(त्रयाणां दण्डानां समाहारः। यतित्रिदण्डे, क्ली। यथा, महाभारते। १२। ३२०।१५५।

"सन्न्यासाश्च राज्यस्य त्रिदण्डस्येव तिष्ठतः।
अन्योन्यगुणयुक्तस्य कः केन गुणतोऽधिकः॥"

कायवाङ्मनोदण्डत्रये। यथा, मनुः। १२।११।

"त्रिदण्डमेतन्निक्षिप्य सर्व्वभूतेषु मानवः।
कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति॥
"सत्त्वमात्मा शरीरञ्च त्रयमेतत्त्रिदण्डवत्।
लोकास्तिष्ठति संयोगात्तत्र सर्व्वं प्रतिष्ठितम्॥"
इति चरके सूत्रस्थाने प्रथमेऽध्याये॥)

त्रिदण्डी, [न्] पुं, (त्रिदण्डमस्यास्तीति। इनिः।) त्रिदण्डधारियतिः। (यथा, महाभारते। १२। ३२०। ८।

"तया जगदिदं कृत्स्नमटन्त्या मिथिलेश्वरः।
तत्र तत्र श्रुतो मोक्षे कथ्यमानस्त्रिदण्डिभिः॥")

कायवाङ्मनोदण्डयुक्तः। इति श्रीभागवतम्॥ (यथा, मनुः। १२। १०।

"वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च।
यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते॥")

यज्ञोपवीतम्। इति लोकप्रसिद्धिः॥

त्रिदला, स्त्री, (त्रीणि त्रीणि दलानि पत्राणि यस्याः।) गोधापदी लता। इति जटाधरः॥

त्रिदलिका, स्त्री, (त्रीणि दलानि यस्याः। कापि अत इत्वम्।) चर्म्मकषा। इति शब्दचन्द्रिका॥

त्रिदशः, पुं, (तृतीया यौवनाख्या दशा यस्य। त्रिशब्दस्यात्र त्रिभागवत् तृतीयार्थकता। यद्वा, तिस्रो जन्मसत्ताविनाशाख्याः न तु मर्त्त्यानामिव